# Shivastotram Asitakrita

# શ્રીશિવસ્તોત્રં અસિતકૃત

## Document Information

Text title : shivastotram asitakRita

File name : shivastotramasitakRita.itx

Category : shiva, stotra

Location : doc_shiva

Transliterated by : Kaushal S. Kaloo kaushalskaloo at gmail.com

Proofread by : Kaushal S. Kaloo kaushalskaloo at gmail.com

Latest update : April 17, 2013

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 3, 2021

*sanskritdocuments.org*

# શ્રીશિવસ્તોત્રં અસિતકૃત

શ્રીગણેશાય નમઃ ॥

અસિત ઉવાચ ।

જગદ્ગુરો નમસ્તુભ્યં શિવાય શિવદાય ચ ।
યોગીન્દ્રાણાં ચ યોગીન્દ્ર ગુરૂણાં ગુરવે નમઃ ॥ ૧॥

મૃત્યોર્મૃત્યુસ્વરૂપેણ મૃત્યુસંસારખણ્ડન
મૃત્યોરીશ મૃત્યુબીજ મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૨॥

કાલરૂપં કલયતાં કાલકાલેશ કારણ ।
કાલાદતીત કાલસ્થ કાલકાલ નમોઽસ્તુ તે ॥ ૩॥

ગુણાતીત ગુણાધાર ગુણબીજ ગુણાત્મક ।
ગુણીશ ગુણિનાં બીજ ગુણિનાં ગુરવે નમઃ ॥ ૪॥

બ્રહ્મસ્વરૂપ બ્રહ્મજ્ઞ બ્રહ્મભાવે ચ તત્પરઃ ।
બ્રહ્મબીજસ્વરૂપેણ બ્રહ્મબીજ નમોઽસ્તુ તે ॥ ૫॥

ઇતિ સ્તુત્વા શિવં નત્વા પુરસ્તસ્થૌ મુનીશ્વરઃ ।
દીનવત્સાશ્રુનેત્રશ્ચ પુલકાઞ્ચિતવિગ્રહઃ ॥ ૬॥

અસિતેન કૃતં સ્તોત્રં ભક્તિયુક્તશ્ચ યઃ પઠેત્ ।
વર્ષમેકં હવિષ્યાશી શઙ્કરસ્ય મહાત્મનઃ ॥ ૭॥

સ લભેદ્વૈષ્ણવં પુત્રં જ્ઞાનિનં ચિરજીવિનમ્ ।
ભવેદ્ધનાઢ્યો દુઃખી ચ મૂકો ભવતિ પણ્ડિતઃ ॥ ૮॥

અભાર્યો લભતે ભાર્યાં સુશીલાં ચ પતિવ્રતામ્ ।
ઇહ લોકે સુખં ભુક્ત્વા યાત્યન્તે શિવસન્નિધિમ્ ॥ ૯॥

ઇદં સ્તોત્રં પુરા દત્તં બ્રહ્મણા ચ પ્રચેતસે ।
પ્રચેતસા સ્વપુત્રાયાસિતાય દત્તમુત્તમમ્ ॥ ૧૦॥

ઇતિ શ્રીબ્રહ્મવૈવર્તે મહાપુરાણે શ્રીકૃષ્ણજન્મખણ્ડે
અસિતકૃતશિવસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Kaushal S. Kaloo kaushalskaloo at gmail.com

*Shivastotram Asitakrita*

pdf was typeset on October 3, 2021

Please send corrections to *sanskrit@cheerful.com*